# गौरि गिरिराजकुमारि गौरी

## रागम्: गौरि     ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

गौरि गिरिराजकुमारि गानवनमयूरि गंभीरकौमारि

**अनुपल्लवि**

दूरीकृतदुरितेऽतिललिते दुर्गालक्ष्मीसरस्वतीसहिते
शौरीशविरिञ्चादिमहिते शाम्भवि नमस्ते परदेवते

**चरणम्**

नवचक्रस्वरूपावतारे नादब्रह्मवाचकतारे

शिवपरमानन्दामृतधारे शृङ्गारादिनवरसाधारे

भवगुरुगुहगणपतिसंसारे भक्तिप्रदवेदागमसारे
पवनधरणयोगपिचारे पालितभक्तजनमन्दारे

**मध्यमकाल साहित्यम्**

तव चरणपङ्कजोद्भवतत्वसमष्टयागारे

सुपर्णमणिमयादिपञ्चविंशतिप्राकारे

सुधासिन्धुमध्ये चिन्तामण्यागारे
शिवाकारमञ्चे परशिवपर्यङ्कविहारे

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇